'फलेसक्तः मम फलायेदं कर्म्म करोमीत्येवं फले-सक्तो नितरां बन्धं प्राप्नोति ।' इति मलमासतत्त्वम् ॥

फलोत्तमा, स्त्री, (फलेषु उत्तमा ।) काकलीद्राक्षा । इति राजनिर्घण्टः ॥ (दुग्धिका । तत्पर्य्यायो यथा,—
"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

फलोत्पत्तिः, पुं, (फलाय उत्पत्तिरस्य । प्रशस्तफलानां उत्पत्तिरत्र वा ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

फलोदयः, पुं, (फलस्य उदयो यत्र ।) लाभः । सुरालयः । हर्षः । इति शब्दरत्नावली ॥ (फलस्य उदयः ।) फलोत्पत्तिः । यथा, रघुः । १ । ५ ।
"सोऽहमाजन्मशुद्धानामाफलोदयकर्म्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥"

फल्कः, पुं, (फल निष्पत्तौ + "इदाधारार्च्चिकलिभ्यः कः ।" उणा० ३।४०। इति कः । सूत्रेऽत्र कलिभ्य इति पाठस्य विकल्पितत्वात् बाहुलकात् क इत्येके ।) विसारिताङ्गम् । इत्युणादिकोषः ॥

फल्गु, त्रि, (फल निष्पत्तौ + "फलिपाटिनमिमनिजनामिति ।" उणा० १ । १८ । इत्युः गुगागमश्च ।) असारम् । इत्यमरः । ३ । १ । ५६ ॥ (यथा, माघे । ३ । ७६ ।
"तरीषु तत्रत्यमफल्गु भाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत् ॥")
निरर्थकम् । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । १५ । ३२ ।
"न फल्गुवाक्यैः प्रतिबोधनीयो
राजा तु वीरैरिति नीतिशास्त्रम् ॥"
सामान्यम् । क्षुद्रम् । यथा, भागवते ।१।१३।४७।
"अहस्तानि सहस्तानामपदानि चतुष्पदाम् ।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥")

फल्गुः, स्त्री, (फल निष्पत्तौ + उः । गुगागमश्च ।) गयास्थनदीभेदः । तस्या माहात्म्यादि यथा,—
"सार्द्धक्रोशद्वयं मानं गयायां परिकीर्त्तितम् ।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥
तत्र पिण्डप्रदानेन तृप्तिर्भवति शाश्वती ।
गमनादेव गयायां क्षुत्तृष्णोत्तरमानसात् ॥
एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ।
तत्र पिण्डप्रदानेन पितृणां परमा गतिः ॥
पृथिव्यां यानि तीर्थानि ये समुद्राः सरांसि च ।
फल्गुतीर्थं गमिष्यन्ति वारमेकं दिने दिने ॥"
इति गारुडे ८३ अध्यायः ॥

अन्यत् गयाशब्दे द्रष्टव्यम् ॥*॥ काकोडुम्बरिका । इत्यमरः ॥ काकडुमर इति भाषा ॥ (अस्याः पर्य्यायो यथा,—
"भद्रा मलपूः फल्गुः स्यात् काकडुम्बरिका च सा ॥"
इति वैद्यकरत्नमालायाम् ॥)
अस्या गुणाः । गुरुत्वम् । ग्राहित्वम् । शीतलत्वम् । स्वादुत्वम् । तृप्तिकारित्वञ्च । इति राजवल्लभः ॥ रेणुभेदः । फागु इति प्रसिद्धः । मिथ्यावाक्यम् । इति शब्दरत्नावली ॥ वसन्तर्त्तुः । इति जटाधरः ॥

फल्गुदा, स्त्री, (फल्गुरिति नाम ददाति धारयतीति । दा धारणे + कः ।) गयानदी । यथा,
"तत्र देशे गया नाम पुण्यदेशोऽतिविश्रुतः ।
नदी च फल्गुदा नाम पितॄणां स्वर्गदायिनी ॥"
इति बृहद्धर्म्मपुराणे ५६ अध्यायः ॥

फल्गुनः, पुं, (फलति कार्य्यादिकमस्मादिति । फल निष्पत्तौ + "फलेर्गुक् च ।" उणा० ३ । ५६ । इति उनन् गुगागमश्च । फल्गुन्यां फल्गुनीनक्षत्रे जातः इति वा । "श्रविष्ठाफल्गुन्यनुराधेति ।" ४ । ३ । ३४ । इति जातार्थप्रत्ययस्य लुक् । "लुक् तद्धितलुकि ।" १।२।४९। इति स्त्रीप्रत्ययस्य च लुक् । एतन्निरुक्तिस्तु फाल्गुनशब्दे द्रष्टव्या ।) अर्ज्जुनः । फाल्गुनमासः । इत्यमरटीकायां भरतः ॥ (फल्गुनीभवे, त्रि । इति सिद्धान्तकौमुदी ॥)

फल्गुनालः, पुं, (फल्गुनेन अलतीति । अल् + अच् ।) फाल्गुनमासः । इति भूरिप्रयोगः ॥

फल्गुनी, स्त्री, (फल्गुन + गौरादित्वात् ङीष् ।) नक्षत्रविशेषः । तच्च पूर्व्वफल्गुनी उत्तरफल्गुनी च । इति भरतधृतगोवर्द्धनानन्दः ॥ (यथा, महाभारते । ४ । ४२ । १६ ।
"उत्तराभ्याञ्च पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा ।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः ॥")
काकोडुम्बरिका । इति राजनिर्घण्टः ॥ (फल्गुन्यां जाता । श्रविष्ठाफल्गुनीति अणो लुकि लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य च लुकि फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ इति वार्त्तिकोक्ताटः । टित्वात् ङीप् ॥)

फल्गुवाटिका, स्त्री, (फल्गूनां वाटीव इवार्थे कन् ।) काकोडुम्बरिका ॥ इति राजनिर्घण्टः ॥ ("गुणादयोऽस्याः काकोडुम्बरिकाशब्दे ज्ञेयाः ॥")

फल्गुवृन्ताकः, पुं, (फल्गुना वृन्तेनाकायति शोभते इति । आ + कै + कः ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

फल्गूत्सवः, पुं, (फल्गूनामुत्सवः ।) फल्गुकारककगोविन्दोत्सवः । दोलयात्रा इति ख्यातः । यथा, दोलयात्रापद्धतिः ।
"गोविन्दानुग्रहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम् ।
फल्गूत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्यहाणि वा ॥"

फल्यं, क्ली, (फलाय हितमिति । फल + यत् ।) कुसुमम् । इति शब्दचन्द्रिका ॥

फल्लकी [न्] पुं, (फल्लकः फलकस्तदाकारोऽस्यास्तीति । इनिः ।) मत्स्यविशेषः । इति शब्दमाला ॥ फलुइ इति भाषा ।

फल्लफलः, पुं, शूर्पवातः । इति जटाधरः ॥ कुलार वातास इति भाषा ॥

फाः, पुं, सन्तापः । निष्फलभाषणम् । यथा,—
"फिः कोपे फाश्च सन्तापे तथा निष्फलभाषणे ॥"
इति शब्दरत्नावली ॥

वृद्धिः । वर्द्धकः । यथा "फा वृद्धौ वर्द्धके पुमान् ।" इति विश्वः ॥

फाटकी, स्त्री, (स्फुट + ण्वुल् । ङीष् । पृषोदरादित्वात् साधुः ।) स्फटी । इति राजनिर्घण्टः ॥

फाणिः, स्त्री, (फाणयतीति । फण गतौ + णिच् + इन् ।) गुडः । करम्भः । इत्युणादिकोषः ॥

फाणितं, क्ली, (फण गतौ + णिच् + क्तः ।) अर्द्धावर्त्तितेक्षुरसः । फेणीति ख्यातम् । इत्यमरभरतौ ॥ (यथा, महाभारते ।१३।६४।२३।
"फल्गुनी पूर्व्वसमये ब्राह्मणानामुपोषितः ।
भक्ष्यान् फाणितसंयुक्तान् दत्त्वा सौभाग्यमृच्छति ॥")
अस्य गुणाः । गुरुत्वम् । अभिष्यन्दित्वम् । बृंहणत्वम् । कफशुक्रत्वम् । वातपित्तश्रमनाशित्वम् । मूत्रवस्तिविशोधनत्वञ्च ॥ * ॥
"इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः ।
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥"
इति भावप्रकाशः ॥
(यथा च ।
"शिराहर्षेऽञ्जनं कुर्य्यात् फाणितं मधुसंयुतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥
"फाणितं शक्तवः सर्पिर्दधिमण्डोऽम्लकाञ्जिकम् ।
तर्षणं मूत्रकृच्छ्रघ्नमुदावर्त्तहरं पिबेत् ॥"
इति चरके सूत्रस्थाने २३ अध्याये ॥)

फाण्टं, त्रि, (फण्यते स्मेति । फण गतौ + "क्षुब्धस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति निपातनात् साधुः ।) अनायासकृतम् । इत्यमरः । ३ । १ । ६४ ॥ कषायभेदः । यथा,—
"क्षिप्तोष्णतोये मृदितः फाण्ट इत्यभिधीयते ।"
अपि च ।
"क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत् ।
पात्रे चतुःपलमिति ततस्तु स्रावयेज्जलम् ॥
सोऽयं चूर्णद्रवः फाण्टो भिषग्भिरभिधीयते ॥"
इति वैद्यकपरिभाषा ॥
(तथास्य प्रस्तुतविधिः ।
"सद्योऽभिषुतस्तु फाण्टस्तन्मानकल्पने ॥"
इति वाभटकल्पस्थाने षष्ठेऽध्याये ॥)

फालं, क्ली, (फलाय शस्याय हितम् । फल + अण् । यद्वा, फल्यते विदार्य्यते भूमिरनेनेति । फल + घञ् ।) हलोपकरणम् । इति मेदिनी । ले, ३४ ॥

फालः, पुं, (फल्यते विदार्य्यते क्षेत्रमनेनेति । फल + करणे घञ् ।) लाङ्गलस्थभूमिविदारकलौहः । फल्यते विशीर्य्यते भूमिरनेन सः । तत्पर्य्यायः । कृषिकः २ । इत्यमरः ।२।९।१३॥ कृषकः ३ । फलम् ४ । इति भरतः ॥ कृषिका ५ । फालम् ६ । इति मुकुटः ॥ कुशिकम् ७ । इति हेमचन्द्रः । ३ । ५५५ ॥ महादेवः । बलदेवः । कार्पासवस्त्रे, त्रि । इति मेदिनी । ले, ३४ ॥ नवविधदिव्यान्तर्गताष्टमदिव्यम् । तस्य विधिर्यथा । बृहस्पतिः ।
"आयसं द्वादशपलघटितं फालमुच्यते ।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम् ॥